# শ্রীসঙ্কষ্টমোচনস্তোত্রম্ ২

{॥ শ্রীসঙ্কষ্টমোচনস্তোত্রম্ ২ ॥}

শ্রীমহেশ্বরানন্দসরস্বতীবিরচিতং স্তোত্রম্

সিন্দূরপূররুচিরো বলবীর্যসিন্ধুঃ

বুদ্ধিপ্রভাবনিধিরদ্ভুতবৈভবশ্রীঃ ।

দীনার্তিদাবদহনো বরদো বরেণ্যঃ

সঙ্কষ্টমোচনবিভুস্তনুতাং শুভং নঃ ॥ ১॥

সোৎসাহলঙ্ঘিতমহার্ণবপৌরুষশ্রীঃ

লঙ্কাপুরীপ্রদহনপ্রথিতপ্রভাবঃ ।

ঘোরাহবপ্রমথিতারিচযপ্রবীরঃ

প্রাভঞ্জনির্জযতি মর্কটসার্বভৌমঃ ॥ ২॥

দ্রোণাচলানযনবর্ণিতভব্যভূতিঃ

শ্রীরামলক্ষ্মণসহাযকচক্রবর্তী ।

কাশীস্থদক্ষিণবিরাজিতসৌধমল্লঃ

শ্রীমারুতির্বিজযতে ভগবান্ মহেশঃ ॥ ৩॥

নূনং স্মৃতোঽপি দদতে ভজতাং কপীন্দ্রঃ

সম্পূজিতো দিশতি বাঞ্ছিত-সিদ্ধিবৃদ্ধিম্ ।

সংমোদকপ্রিয উপৈতি পরং প্রহর্ষং

রামাযণশ্রবণতঃ পঠতাং শরণ্যঃ ॥ ৪॥

শ্রীভারতপ্রবরযুদ্ধরথোদ্ধতশ্রীঃ
পার্থৈককেতনকরালবিশালমূর্তিঃ ।
উচ্চৈর্ঘনাঘনঘটাবিকটাট্টহাসঃ
শ্রীকৃষ্ণপক্ষভরণঃ শরণং মমাঽস্তু ॥ ৫॥

জঙ্ঘালজঙ্ঘ উপমাতিবিদূরবেগো
মুষ্টিপ্রহারপরিমূর্চ্ছিতরাক্ষসেন্দ্রঃ ।
শ্রীরামকীর্তিতপরাক্রমণোদ্ধবশ্রীঃ
প্রাকম্পনির্বিভুরুদঞ্চতু ভূতযে নঃ ॥ ৬॥

সীতার্তিদারণপটুঃ প্রবলঃ প্রতাপী
শ্রীরাঘবেন্দ্রপরিরম্ভবরপ্রসাদঃ ।
বর্ণীশ্বরঃ সবিধিশিক্ষিতকালনেমিঃ
পঞ্চাননোঽপনযতাং বিপদোঽধিদেশম্ ॥ ৭॥

উদ্যদ্ভানুসহস্রসন্নিভতনুঃ পীতাম্বরালঙ্কৃতঃ
প্রোজ্জ্বালানলদীপ্যমাননযনো নিষ্পিষ্টরক্ষোগণঃ ।
সংবর্তোদ্যতবারিদোদ্ধতরবঃপ্রোচ্চৈর্গদাবিভ্রমঃ
শ্রীমান্ মারুতনংদনঃ প্রতিদিনং ধ্যেযো বিপদ্ভঞ্জনঃ ॥ ৮॥

***Stotram Digitalized By [Sanskritdocuments.org](Sanskritdocuments.org)***

রক্ষঃ পিশাচভযনাশনমাময়াধি

প্রোচ্চৈর্জ্বরাপহরণং হননং রিপূণাম্ ।

সম্পত্তিপুত্রকরণং বিজযপ্রদানং

সঙ্কষ্টমোচনবিভোঃ স্তবনং নরাণাম্ ॥ ৯॥

দারিদ্র্যদুঃখদহনং শমনং বিবাদে

কল্যাণসাধনমমঙ্গলবারণায ।

দাম্পত্যদীর্ঘসুখসর্বমনোরথাপ্তিং

শ্রীমারুতেঃ স্তবশতাবৃতিরাতনোতি ॥ ১০॥

স্তোত্রং য এতদনুবাসরমাপ্তকামঃ

শ্রীমারুতিং সমনুচিন্ত্য পঠেত্ সুধীরঃ ।

তস্মৈ প্রসাদসুমুখো বরবানরেন্দ্রঃ

সাক্ষাৎকৃতো ভবতি শাশ্বতিকঃ সহাযঃ ॥ ১১॥

সঙ্কষ্টমোচনস্তোত্রং শঙ্করাচার্যভিক্ষুণা ।

মহেশ্বরেণ রচিতং মারুতেশ্চরণেঽর্পিতম্ ॥ ১২॥

ইতি কাশীপীঠাধীশ্বর জগদ্গুরুশঙ্করাচার্যস্বামি

শ্রীমহেশ্বরানন্দসরস্বতীবিরচিতং শ্রীসঙ্কষ্টমোচনস্তোত্রং সম্পূর্ণম্ ।

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sankashta Mochana Stotram Lyrics in Bengali PDF
% File name : saMkaShTamochanastotram2.itx
% Location : doc_hanumaana
% Author : maheshvarAnandasarasvatI
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 19, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website